शाद्वलान्यासन्नश्मरात्पर्यपोषरात् DvyāśraKā. 3.35 (comm. उषरादप रिरिणं (इरिणं) देशं वर्जयित्वा)

**अप** (apa) *n.* hymn which begins with the word *apa* (viz. *apa naḥ śośucadagham* ... (ṚV. i.97), जप्त्वा कौत्समपेत्येतद्वासिष्ठम् ... सुरापोऽपि विशुध्यति VasiSm. 26.6.

**अप** (apa) *m.* **1** name of one of the Harita deities पवतानुचरश्चैव अपोंऽशुदश्च मनोजवः। ... दशैते हरिताः स्मृताः VāyuP. ii.38.89; **2** name of Kampa's son स्रावस्त्यामंगिकागर्भे कंपेनापाभिधोऽभवत् PadmP. (Ra.) 91.24.

**अप** (a-pa) *adj.* without the letter *'pa'* किं त्वपाविति द्विवचनेन निर्देशे कृते अविद्यमानः पकारो ययोः तावपाविति PariVṛ. (Sī.) 92.2.

**अपऋ** (apa-ṛ-) I.P. to drive away ते होचुर् ब्राह्मणं वा अनार्यम् अपाराम। तेषां नोऽग्नेर् हरोऽपाक्रमीत् JaimiBr. 3.96.

**अपऋ** (apa-ṛ-) V.P. (Vedic) to throw open, to open अप॒ या मा॒ताँ ऋ॑णुत व्र॒जं गोः ṚV. v.45.6; अप॒ द्वारा॑ मती॒नां प्र॒त्ना ऋ॑ण्वन्ति का॒रवः॑। वृष्णो॒ हर॑स आ॒यवः॑ ṚV. ix.10.6.

**अपकण्टक** (apa-kaṇṭaka) *adj.* [*f.* –ā] **1** free from thorn सस्थूलस्थाणुवल्मीकवृक्षगुल्मा अपकण्टका। सापसारा पदातीनां भूर्नातिविषमा मता NītiSā. 20.10; AgniP. 241.28; **2** free from thorn, i.e. enemy or opponent अन्तःपुरैः सुहृद्भिश्च साकं नयजितां महीम्। भुञ्जानः सुकृतप्राप्तां सुखमास्तापकण्टकाम् KathāSaSāg. vii.6.112; मदर्थं कुर्वता राज्यम् प्रयत्नादपकण्टकम् RājTa. (Ka.) 8.1352 [free from danger, nt.]

**अपकण्टक** (apakaṇṭaka) *m.* the plant Asteracantha Longifolia केकणिः काकपादश्च व्याघ्रपादोऽपकण्टकः NighŚe. 254.1967.

**अपकन्द** (apa-kanda) *m.* name of a person (*lit.* without a lump) (परमेष्ठिने) तस्मै प्राञ्जलयः स्थिताः। कश्यपश्चापकन्दश्च तक्षकश्च महाबलः PadmP. v.18.23.

**अपकन्धर** (apa-kandhara) *m.* small neck or dado कुर्याच्छरावमपकन्धरपालिकावदूर्ध्वार्धमस्य घटिकावदथाधरार्धम् TantrSa.12.19; ŚilpaRa. ii. 28.10.

**अपकर** (apakara) *m.* **A** the word or expression *apakara* सिन्ध्वपकराभ्यां कन् P. iv.3.32; सिन्ध्वपकराभ्यां कन् अणञौ च Vār.26 *on* P.i.3.10; सिन्ध्वपकरादण् JaineVyā.iii.3.4 (195.8); CāndraVyā. iii.3.4; सिन्धु अपकर इत्येताभ्यामण् भवति JaineVṛ. 195.8 (*on* iii.3.4); सिन्ध्वपकरात्काणौ ŚākaṭāVyā. iii.1.91; **B** name of a particular place अपस्कर इति रथांगे। अपकीर्यतेऽसावित्यपस्करो रथावयवः। अपकर इत्यन्यत्र JaineVṛ. 300.18 (*on* iv.3.116); अपस्करो रथावयवः। रथाङ्गमिति किम्। अपकरः KāśiVṛ. *on* vi.1.149; अपकरे जातः। अपकरकः ŚākaṭāVyā. iii.1.91; SiddhaHe. vi.3.101; GaṇRa. 2.151(188); Prasā. i. 681.12; अपकरोऽन्यः SiddhāKau.221A.24 (*on* vi. 1.149)

**अपकर** (apa-kara) *adj.* **1** causing unhappiness or discomfront, i.e. miserable कमप्यपकरं दृष्ट्वा शरीरमतिभङ्गुरम्। निःशेषसङ्गनिर्मुक्तः ... महाव्रतधरः श्रीमाञ्श्रीशैलः सुशुभेतराम् PadmP. (Ra.) 113.33; **2** false or (more probably) error for Skt. *avakara*, rubbish, DBHS.

**अपकरक** (apakara-ka) *m.* [P.iv.3.32] one born at Apakara (सिन्ध्वपकराभ्यां कन्) सिन्धुशब्दादपकरशब्दाच्च कन् भवति तत्र जात इत्येतस्मिन्विषये। ... अपकरशब्दादप्यौत्सर्गिकेऽणि। सिन्धुकः। अपकरकः KāśiVṛ. *on* iv.3.32; CāndraVṛ. *on* iii.3.4; JaineVṛ. 195.15 (*on* iii.3-5); ŚākaṭāVyā. iii.1.91; Prasā. i.769.2; SiddhāKau. 257B.10 (*on* iv.3.32)

**अपकरण** (apa-karaṇa) *n.* **1A** act of taking fraudulently न हि जातु स्तेयमिति लोकप्रसिद्धं यथा धैर्यादिना अपकरणम् ManuBh. ii.390.10 (*on* 11.65); **1B** act of destroying (अहितापकरणभेषज नरनाथ भवान्करस्थितो यस्य) अहितानामपकरणमेवाहीनां तापकरणमिति श्लेषमूलकेनारोपेण ... कवेरभिप्रायः RasGaṅ.309.9. **2** act of harming or injuring, cf. **अपकरणधी** [doing wrong, illtreating, offending, APTE.]

**अपकरणधी** (apakaraṇa-dhī) *f.* thought or intention of harming or injuring अनुचितममुना किमग्रजस्य व्यवसितमुन्नतचेतसा यदास्मिन्। अपकरणधिया चकार संधिं कुलरिपुणा सह चोलराजिगेन VikraDeC. 6.38.

**अपकरणावसर** (apakaraṇāvasara) *m.* occasion or opportunity for act of harming or injuring अपि नृपतिरसौ समीपमागादपकरणावसरं चिरादवाप्य VikraDeC. 6.54.

**अपकरुण** (apa-karuṇa) *adj.* merciless, cruel यस्त्विह वा उग्रः पशून्पक्षिणो वा प्राणत उपरन्धयति तमपकरुणं पुरुषादैरपि विगर्हितममुत्र यमानुचराः कुम्भीपाके तप्ततैले उपरन्धयन्ति BhāgP. v.26.13; दृष्ट्वा धर्मद्रुहं तं कलिमपकरुणं प्राङ् महीक्षित् परिक्षित् हन्तुं व्याकृष्टखड्गोऽपि न विनिहतवान् सारवेदी गुणांशात् Nārāy.xi.92.8.

**अपकरुणात्मन्** (apakaruṇātman) *adj.* of the nature of being merciless or cruel क्वासि वृन्दे प्रिये कान्ते मयापकरुणात्मना। राक्षसीत्यभिशप्तासि BṛDharmaP. i.7.66.

**अपकर्ण्** (apa-karṇ-) X.P. not to listen, i.e. to neglect वचनं मदीयमपकर्णयति ĀścaCū. 4.13.

**अपकर्ण** (apa-karṇa) *adj.* (used as noun) (one) who is devoid of ears, i.e. a snake आर्द्रावले व्रज न वेत्स्यपकर्ण कर्णम् KāvyMī. 43.24.

**अपकर्णन** (apa-karṇana) *n.* act of absence of listening, i.e. disregarding ततोऽपकर्णाभं (v.l. ततोऽपकर्णनं, Varanasi Ed.) कृत्वा पितुः सन्नाहमण्डपम्। गत्वा ... अवीवदत् PadmP.(Ra.) 12.181.

**अपकर्णाभम्** (apakarṇābham) *adv.* as if not listening, i.e. disregardingly ततोऽपकर्णाभं कृत्वा पितुः सन्नाहमण्डपम्। गत्वा ... अवीवदत् PadmP.(Ra.) 12.181.

**अपकर्णित** (apa-karṇita) *adj.* [*f.*–ā] who has not listened, i.e. ignored or disregarded अपकर्णिततद्वाक्यौ जानकी वीक्ष्य पुत्रकौ। जगाद PadmP.(Ra.)101.31; सकर्णांस्तूर्णयेत् स्वर्गवर्णिका वर्णिताप्यहो। निर्वर्णिताप्यकर्णाभिरस्माभिरपकर्णिता ŚāliC. 6.69.

**अपकर्ण्य** (apakarṇ-ya) *ger.* **A** not having listened to, having disregarded अपकर्ण्य ततो धात्रीं खेचरद्युतिवर्णिनीम्। तस्याः पपात किष्कन्धकुमारे दृष्टिः PadmP.(Ra.) 6.426; 17.107; सुभूतिचरितं पापमपकर्ण्य गुरूदितम्। मोहध्वान्तपरीतेन दह्ये यदधुना स्मरन् PadmP.(Ra.) 41.37; अपकर्ण्य महीपालो मन्त्रिणो मन्त्रकोविदान्। परचक्राभिभूतोऽपि रक्तया सह तिष्ठति BṛKathāK. 85.4; तस्याततायिनो वाक्यमनाकर्ण्य (v.l.अपकर्ण्य, Bhavnagar Ed.) एव निर्भयौ। आगत्य मिलितौ ज्येष्ठबन्धोर्भीमधनञ्जयौ PāṇḍaC. 9.174.

**अपकर्तन** (apa-kartana) *n.* act of cutting into pieces, i.e. causing abortion गर्भाणां चापकर्तनम् ... ब्रह्महत्यासमो वधः MahāviC. 3.19 (73.7)

**अपकर्तव्य** (apa-kartavya) *adj.* **A** to be wronged यः खलु पुत्रो मनसितपरंपरया लभ्यते स कथमपकर्तव्यः ... तस्मादात्मजस्य नो पापं चिन्तनीयं कथंचन NītiVā. 24.80; **B** (pred.) to be offended, to be attacked सन्धिर्नावाभ्यामन्योऽन्यमपकर्तव्यमिति व्यवस्था परिग्रहः Aparā. 586.22 (*on* 1.345); DīpKa. 34.29 (*on* 1.347); VīraMi.372.4 (*on* 1.347)

**अपकर्तुकाम** (apakartu-kāma) *adj.* **A** desirous of doing harm or injury परप्रयुक्तः स्वेन वा दोषेणापकर्तुकामः परस्योच्छेत्तारममित्रं मे ज्ञात्वा प्रतिघातभयादागतः ArthŚā.ii.274.2 (7.6); ManuBh. ii.55.10 (*on* 7.186); **B** desirous of causing opposition or hostility विरसं वा मयि शक्तं अपकर्तुकामं च प्रकृतिमापादयिष्यति KāmSū.64.20 (1.5); JayaMa. 64.21 (*on* 1.5); अस्मदमित्रादपकर्तुकामात्पतिं प्रभवन्ती निवर्तयिष्यति JayaMa. 64.17 (*on* 1.5)

**अपकर्तुम्** (apa-kartum) *inf.* **1Ai** to harm or injure शक्यमस्य प्रतिहस्तिप्रोत्साहनेनापकर्तुम् ArthŚā. i.69.5 (1.14); i.105.2 (3.18); बृहस्पतिः ... शशाक ... न ... तस्यापकर्तुं विविधैरुपायैर्वाभिचारैरपि वागधीशः MatsyaP. 23.33; PadmP.v.12.37; यस्य (कृष्णस्य) किंचिदपकर्तुमक्षमः ... राहुरिन्दुमधुनापि बाधते ŚiśuVa. 14.78; KāvyPra. 726.4; AlaṅkāSa. 165.1; तथा धर्म एव पालितः सर्वतो भयमपनुदति नापकर्तुमर्थ्यादयः क्रुद्धाः शक्नुवन्ति ManuBh.ii.80.6 (*on* 8.15); अपकर्तुमत्र समये तवात्तभीर्मनसापि हूणनृपतिर्न वाञ्छति NavaSāC. 10.14; रक्षोयक्षोरगव्याघ्रव्यालानलगरादयः। नापकर्तुं अलं तेषां यैर्धर्मः शरणं श्रितः YogŚā. 4.101; **1B** to offened, to cause nuisance प्रत्यादिष्टस्त्वरते रिपुरपकर्तुम् बलात्प्रहर्तुं वा Tantrākhyā. 24.29; PañcT. 1.85 [92.4]; किमसौ ममापकर्तुं समर्थः PañcT. 1.85(2) [93.2]; का शक्तिरस्य स्वतोऽपकर्तुम् परतोऽपकर्तुं वा PañcT.1.85(6) [93.6]; 1.124 (10) [125.2](v.l.); BṛKathāMañ.xvi.1.330; दुष्टभावान्ममैव त्वमपकर्तुमिहागतः GaṇeP.ii.127.32; अस्मानुत्सहते कश्चिन्नापकर्तुं बलाधिकः RājTa.(Ka.) 3.293; किं ममैतेन वृथा शरीरशोषेण। यतो न किञ्चिन्मया तस्यापकर्तुं शक्यते। अथवा साध्विदमुच्यते यो ह्यपकर्तुमशक्तः कुप्यति किमसौ स तस्य निर्लज्जः Pañcā.17.20; **1C** to wrong अपकर्तुमप्युपगता महाशयाः स्फुटपौरुषेषु न भजन्ति मत्सरम् RāmC.20.95; **2** to remove, to separate भद्रबाह्वागमे स वराहो बाढं मम्लौ। तथापि तेभ्यो नापकर्तुमशकदसौ PrabaK.3.15.

**अपकर्तृ** (apa-kartṛ) *adj.* (*f.*–rī) **1A** (used as noun) one who insults, i.e.ill-wisher योऽपकर्तृंश्च कर्तृंश्च तेजसैवोपगच्छति। तस्मादुद्विजते लोकः